तस्मात्सर्वात्मना नित्यं श्रीकृष्णः शरणं मम ।
वदद्भिरेवं सततं स्थेयमित्येव मे मतिः ॥ ९ ॥

इति श्रीवल्लभाचार्यविरचितं नवरत्नस्तोत्रं समाप्तम् ।

## अथांःतकरणप्रबोधः ।

श्रीकृष्णाय नमः ।

अंतःकरण मद्वाक्यं सावधानतया शृणु ।
कृष्णात्परं नास्ति दैवं वस्तु दोषविवर्जितम् ॥ १ ॥
चांडाली चेद्राजपत्नी जाता राज्ञा च मानिता ।
कदाचिदपमानेऽपि मूलतः का क्षतिर्भवेत् ॥ २ ॥
समर्पणादहं पूर्वमुत्तमः किं सदा स्थितः ।
काममाधमता भाव्या पश्चात्तापो यतो भवेत् ॥ ३ ॥
सत्यसंकल्पतो[१] विष्णुर्नान्यथा तु करिष्यति ।
आज्ञैव कार्या सततं स्वामिद्रोहोऽन्यथा भवेत् ॥ ४ ॥
सेवकस्य तु धर्मोऽयं स्वामी स्वस्य करिष्यति ।
आज्ञापूर्वं तु या जाता गंगासागरसंगमे ॥५॥
यापि पश्चान्मधुवने न कृतं तद्वयं मया ।
देहदेशपरित्यागस्तृतीयो लोकगोचरः ॥६॥

१ संकल्पितो इति पाठः.

पश्चात्तापः कथं तत्र सेवकोऽहं न चान्यथा ।
लौकिकप्रभुवत्कृष्णो न द्रष्टव्यः कदा चन ॥७॥
सर्वं समर्पितं भक्त्या कृतार्थोऽसि सुखी भव ।
प्रौढापि दुहिता यद्वत्स्नेहान्न प्रेष्यते वरे ॥८॥
तथा देहे न कर्तव्यं वरस्तुष्यति नान्यथा ।
लोकवच्चेत्स्थितिर्मे स्यात्किं स्यादिति विचारय ॥९॥
अशक्ये हरिरेवास्ति मोहं मागाः कथं च न ।
इति श्रीकृष्णदासस्य वल्लभस्य हितं वचः ॥१०॥
चित्तं प्रति यदाकर्ण्य भक्तो निश्चिततां व्रजेत् ॥११॥

इति श्रीवल्लभाचार्यविरचितांतःकरणप्रबोधः समाप्तः ।

## ॥ अथ विवेकधैर्याश्रयः ।

श्रीकृष्णाय नमः ।

विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।
विवेकस्तु हरिः सर्वं निजेच्छातः करिष्यति ॥१॥
प्रार्थिते वा ततः किं स्यात्स्वाम्यभिप्रायसंशयात् ।
सर्वत्र तस्य सर्वं हि सर्वसामर्थ्यमेव च ॥२॥
अभिमानश्च संत्याज्यः स्वाम्याधीनत्वभावनात् ।
विशेषतश्चेदाज्ञा स्यादंतःकरणगोचरः ॥३॥